अ० । द्रौपदीकृतकृष्णस्तवः । "आकूतिः सत्या मनसो मे अस्तु" ऋ० १०,१२८,४ । "सं म आकूतिर्ऋध्यात्" ऋ० ४,३६,२ । संज्ञायां क्तिच् । स्वायम्भुवमनोः शतरूपायां पत्न्यामुत्पादिते कन्याभेदे तत्कथा यथा । "कस्य रूपमभूद्द्वेधा यत् कायमभिचक्षते । ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत । यस्तु तत्र पुमान् सोऽभून्मनुः स्वायम्भुवः स्वराट् । स्त्री याऽऽसीत् शतरूपाख्या महिष्यस्य महात्मनः । तदा मिथुनधर्मेण प्रजा ह्येधाम्बभूविरे । स चापि शतरूपायां पञ्चापत्यान्यजीजनत् । प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ! । आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ! । आकूतिं रुचये प्रादात् कर्द्दमाय तु मध्यमाम् । दक्षायादात् प्रसूतिञ्च यत आपूरितं जगत्" भा० ३स्क० ।

**आकृति** स्त्री आक्रियते व्यज्यते जातिरनया करणे क्तिन् । जातिव्यञ्जकेऽवयवसंस्थानभेदे । "आकृतिग्रहणा जातिः" महाभा० । "जात्याकृतिव्यक्तयस्तु पदार्थः" गौ०सू० तत्राकृतिलक्षणं तत्रैवोक्तम् "आकृतिर्जातिलिङ्गाख्या" गौ० । "जातेर्गोत्वादेः सास्नादिः संस्थानविशेषो हि लिङ्गमिति । "इयमाकृतिरेव शक्यार्थः इति केचिन्मन्यन्ते । तदभिप्रायेण, महाभा० । "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द इति" अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिन" इति । "लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते" इति च महाभा० । गौतमेन तु इतरपक्षनिराकरणेन त्रयाणामेव शक्यार्थत्वमुररीकृतं यथा । "आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः" सू० । आकृतिः पदार्थः कुतः सत्त्वस्य प्राणिनोगवादेर्व्यवस्थानसिद्धेर्व्यवस्थितत्वसिद्धेः तदपेक्षत्वादाकृत्यपेक्षत्वात् अयमश्वोगौरयमित्यादिव्यवहारस्याकृत्यपेक्षत्वात् आकृतिरेव शक्यार्थः । इति यन्मतं तद्दूषयित्वा जातेः पदार्थत्वमाह "व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः" सू० । मृद्गवके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रसङ्गात् जातिः पदार्थः । इतरथा मृद्गवकस्यापि व्यक्तित्वात् गवाकृतिमत्त्वाच्च वैधप्रोक्षणादिप्रसङ्ग इति भावः । एवं जात्याकृतिव्यक्तीनां प्रत्येकस्य शक्यत्वपक्षं निराकृत्य त्रयाणामेव शक्यत्वमित्याह । 'जात्याकृतिव्यक्तयस्तु पदार्थः" सू० "तुशब्देन एकमात्रपदार्थत्वव्यवच्छेदः एकवचनं तु तिसृष्वप्येकैव शक्तिरिति सूचनाय, विभिन्नशक्तौ कदाचित् कस्यचिदुपस्थितिः स्यात् । शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वं तथैव शक्तिग्रहात् । नचाकृत्यादिसाधारणशक्यतावच्छेदकाभावात् न शक्यैक्यम् इति वाच्यम् तथा नियमे मानाभावात् इदं गवादिपदमभिप्रेत्याह तेन पश्वादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः जातिपदं वा धर्म्मपरं तथैव लक्षणस्य वक्तव्यत्वादिति" वृत्तिः । एवं शक्यत्वं व्यवस्थाप्य आकृतेर्लक्षणमुक्तं "आकृतिर्जातिलिङ्गाख्या" सू० प्राग्विवृतम् । एतेनाकृतिशब्दस्य जातिव्यक्त्योः संबन्धपरत्वकल्पनमर्वाचीनानां परास्तम् सम्बन्धस्य जातिलिङ्गत्वाभावात् तस्य शक्यतावच्छेदसम्बन्धत्वेन शक्यत्वाभावाच्च । शा०भा० आकृतीनां नित्यत्वोक्तिः तुल्याकृतिप्रवाहनित्यत्वाभिप्रायेण द्रष्टव्या "यत्राकृतिस्तत्र गुणा वसन्ति" नीतिः "न तुलाविषये तवाकृतिः" "त्वदुदाहरणाकृतौ गुणाः" इति च नैष० २आकारे "इङ्गितं हृद्गतोभावो बहिराकार आकृतिरिति" सज्जनोक्तेः ३आकृतियुक्ते देहे "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शकु० । "स्पष्टाकृतिः पत्ररथेन्द्रकेतोः" रघुः । "स्फुरितं मनोगतमिवाकृतयः" "गोवर्द्धनस्याकृतिरन्वकारि" इति च माघः । "नाकृतिगुरुता गुरुता" उद्भटः । ४आकरे मूलग्रन्थादौ च आकृतिगणः ।

**आकृतिगण** पु० आकृतौ आकारप्रसिद्धोगणः शाक०त० । पाणिन्युक्ततत्तत्कर्म्मनिमित्ते शब्दसमूहे । यथा स्वरादिराकृतिगणः कण्ड्वादिरित्यादि गणपाठे भूरिप्रयोगः ।

**आकृतिच्छत्रा** स्त्री छादयति छद-णिच् कर्त्तरि ष्ट्रन् ह्रस्वः २त० । (घोषा) घोषातकीलतायाम् ।

**आकृष्ट** त्रि० आ+कृष-क्त । कृताकर्षणे । "नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं स्थानतः" महाना० ।

**आकृष्टि** स्त्री आ+कृष-क्तिन् । आकर्षणे ।

**आके** अव्य० आ+कन-डे । १अन्तिके २दूरे च निरु० । "त्वमग्ने ऋभुराके नमस्य" ऋ०२,१,१०

**आकेकरा** स्त्री आके अन्तिके कीर्य्यते कृ-कर्म्मणि अप् । "दृष्टिराकेकरा किञ्चित्स्फुटापाङ्गे प्रसारिता । मीलितार्द्धाऽपरा लोके तारा व्यावर्त्तनोल्वणा" इत्युक्तलक्षणे दृष्टिभेदे नेत्रादिविशेषणत्वे न० "निमीलदाकेकरलोलचक्षुषा" माघः ।

**आकेनिप** त्रि० आकेऽन्तिके निपतन्ति नि+पत-ड । अन्तिकपातिनि "आकेनिपासो अहभिर्दविध्वतः" ऋ०४,४५,६,

**आकोकेर** पु० ज्योतिषोक्ते मकरराशौ । "क्रियतावुरिजितुमकुलीरलेयपाथेययूककौर्पाख्याः । तैक्षिक आकोकेरोहृ-